# Shri Para Mahayoni Kavacha Sadhana

# શ્રીપરામહાયોનિકવચસાધના

## Document Information

Text title : Para Maha Yoni Kavacha Sadhana

File name : parAmahAyonikavachasAdhanA.itx

Category : devii, dashamahAvidyA, devI, kavacha

Location : doc_devii

Transliterated by : Pankaj Dubey

Proofread by : Pankaj Dubey, Preeti N Bhandare

Latest update : December 14, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

Shri Para Mahayoni Kavacha Sadhana

# શ્રીપરામહાયોનિકવચસાધના

॥ શ્રીમહા-ત્રિપુર-સુન્દર્યૈ નમઃ ॥

॥ પૂર્વ પીઠિકા ॥

ॐ નમઃ શિવાય ગુરવે, નાદ-વિન્દુ-કલાત્મને ।

શ્રી ગણેશાય નમઃ । શ્રી મન્મહા-ત્રિપુર-સુન્દર્યૈ નમઃ ।

॥ શ્રી ભૈરવ ઉવાચ ॥

ક્રમ-દીક્ષા-વિધાનાનિ, મયોક્તાનિ મહેશ્વરિ! ।

ત્વયાત્મનઃ કુલાગારે, કવચં યત્ સુ-ગોપિતમ્ ॥ ૧॥

અધુના કૃપયા ત્વં ચ, તત્-સર્વં વક્તુમર્હસિ ।

॥ શ્રી ભૈરવ્યુવાચ ॥

શ ૃણુ ! નાથ પ્રવક્ષ્યામિ, તન્ત્ર-સારમિદં મહત્ ॥ ૨॥

એતચ્છ્રી-કવચસ્યાસ્ય, પર-બ્રહ્મ ઋષિઃ શિવઃ ।

મહતી જગતીચ્છન્દશ્ચિચ્છક્તિર્દેવતોચ્યતે ॥ ૩॥

ઐં વીજં હ્રીં તથા શક્તિઃ, સકલહ્રીં કીલકં તથા ।

પર-બ્રહ્મ-પ્રાપ્તિ-હેતૌ, વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૪॥

અથ ॥ વિનિયોગ ॥

ॐ અસ્ય શ્રી પરા-મહા-યોનિ-કવચસ્ય શ્રી પર-બ્રહ્મ-શિવઃ ઋષિઃ ।

મહતી જગતીઃ છન્દઃ । શ્રી ચિચ્છક્તિઃ દેવતા । ઐં વીજમ્ । હ્રીં શક્તિઃ ।

સકલહ્રીં કીલકમ્ । પર-બ્રહ્મ-પ્રાપ્તિ-હેતૌ પાઠે વિનિયોગઃ ।

॥ ઋષ્યાદિ-ન્યાસ ॥

શ્રી પર-બ્રહ્મ-શિવઃ-ઋષયે નમઃ શિરસિ ।

મહતી જગતીઃ - છન્દસે નમઃ મુખે ।

શ્રી ચિચ્છક્તિઃ - દેવતાયૈ નમઃ હૃદયે ।

ઐં-વીજાય નમઃ ગુહ્યે ।
હ્રીં-શક્ત્યે નમઃ નાભૌ ।
સકલહ્રીં-કીલકાય નમઃ પાદયોઃ ।
પર-બ્રહ્મ-પ્રાપ્તિ-હેતૌ પાઠે વિનિયોગાય નમઃ સર્વાઙ્ગે (સર્વાઙ્ગે) ।
॥ ધ્યાન ॥
ૐ આધારે તરુણાર્ક-બિમ્બ-રુચિરં હેમ-પ્રભં વાગ્ભવમ્ ।
બીજં મન્મથમિન્દ્ર-ગોપ-સદૃશં હૃત્-પઙ્કજે સંસ્થિતમ્ ॥

વિષ્ણુ-બ્રહ્મ-પદસ્થ-શક્તિ-કલિતં સોમ-પ્રભા-ભાસુરમ્ ।
યે ધ્યાયન્તિ પદ-ત્રયં તવ શિવે ! તે યાન્તિ સૌખ્યં પદમ્ ॥

અથ કવચ પાઠ ।
ૐ હ્રી સ્ત્રીં હૂં ફટ્ ઉગ્ર-તારા, મૂલાધારં મમાવતુ ।
હ્રીં ભુવનેશ્વરી પાતુ, સ્વાધિષ્ઠાનં ચ મે સદા ॥ ૧॥

ક્રીં હૂં હ્રીં દક્ષિણા પાતુ, મણિપુરં તથા મમ ।
નમો ભગવત્યૈ હસ્ખ્ફ્રેં, કુબ્જિકાયૈ શ્રાં શ્રીં શ્રૂં શ્રાં શ્રીં  શ્રૂમ્ ।
ઙઞણનમે-અઘોરા-મુખિ છાં છીં કિણિ-કિણિ વિચ્ચે ॥ ૨॥

અનાહતં સદા પાતુ, કુબ્જિકા પરમેશ્વરી ।
ક્રેં ખ્ફ્રેં ગુહ્ય-કાલી સા, વિશુદ્ધં મે ચ રક્ષતુ ॥ ૩॥

ક-એ-ઈ-લ-હ્રીં હ-સ-ક-હ-લ-હ્રીં સ-ક-લ-હ્રીં શ્રીમ્ ।
આજ્ઞા-ચક્રં મહા-દેવી, ષોડશી પાતુ મે સદા ॥ ૪॥

હસ્ક્ષ્મ્લવરયૂઁ શક્ષ્મ્લવરયીમ્ ।
નાદ-ચક્રં ચ મે પાતુ, શ્રીમદાનન્દ-ભૈરવઃ ॥ ૫॥

હ્સૌઃ શૌઃ અર્ધ-નારીશ્વરી બિન્દુશ્ચ મેઽવતુ ।
હંસઃ સોઽહં સદા પાતુ, સહસ્રારં સદા મમ ॥ ૬॥

કએઈલહ્રીં  હસકહલહ્રીં  સકલહ્રીં  શ્રીમ્ ।
શિરો મે પાતુ સા દેવી, મહા-ત્રિપુર-સુન્દરી ॥ ૭॥

“કએઈલહ્રીં” કામેશી, ભ્રૂ-મધ્યં મે સદાઽવતુ ।
“હસકહલહ્રીં” વજ્રેશી, દક્ષ-નેત્રં સદાઽવતુ ॥ ૮॥

“સકલહ્રીં” વામ-નેત્રં, રક્ષતુ ભગ-માલિની ।
“હસ્રૈં હસ્કલહ્રીં હ્સૌઃ”, ત્રિ-નેત્રં પાતુ ભૈરવી ॥ ૯॥

“હ્રીં શ્રીં સૌઃ” ત્રિપુરા-સિદ્ધા, કર્ણૌ મે પરિ-રક્ષતુ ।
“હ્રીં ક્લીં ક્ષું” માં સદા પાતુ, મુખં ત્રિપુર-માલિની ॥ ૧૦॥

“હસૈં હસ્ક્લીં હસૌં” કણ્ઠં, પાતુ શ્રીત્રિપુરા-શ્રીર્મે ।
“હૈં હક્લીં હસૌં” પાતુ, વક્ષસ્ત્રિપુર-વાસિની ॥ ૧૧॥

દૌવારિજૌ સદા પાતુ, હ્યાણિમાદ્યષ્ટ-સિદ્ધયઃ ।
“હ્રીં ક્લીં સૌઃ” પાતુ મે નાભિં, પરા ત્રિપુર-સુન્દરી ॥ ૧૨॥

દશ-મુદ્રા-યુતા દેવી, મમોરુ પાતુ સર્વદા ।
“ઐં ક્લીં સૌઃ” પાતુ મે જાનૂ, શ્રીમહા-ત્રિપુરેશ્વરી ॥ ૧૩॥

ષડ્-દર્શનં સદા પાતુ, જઙ્ઘા-યુગ્મં ચ સર્વદા ।
“અં આં સૌઃ” ત્રિપુરા પાતુ, પાદૌ ચ સતત નમઃ ॥ ૧૪॥

“ૐ હ્રીં શ્રીં” પાતુ માં પૂર્વે, શ્રીમહા-ભુવનેશ્વરી ।
“કએઇલહ્રીં” દક્ષિણે માં, પરાઽઽદ્યા પરિ-રક્ષતુ ॥ ૧૫॥

“સૌઃ ઐં ક્લીં હ્રીં શ્રીં” શ્રીકુજા, પશ્ચિમે માં સદાઽવતુ ।
“શ્રીં હ્રીં ક્લીં ઐં સૌઃ” ચોત્તરે માં, પાતુ યોગેશ્વરી પરા ॥ ૧૬॥

“હસકહલહ્રીં” પાતુ, મામધો વજ્ર-યોગિની ।
“સકલહ્રીં” સા લલિતા, હ્યૂર્ધ્વે માં પરિ-રક્ષતુ ॥ ૧૭॥

શ્રીં-૫ ૐ-૩ ક-૫ હ-૬ સ-૪ સૌઃ-૫ સદાઽવતુ ।
સર્વાઙ્ગં મે ચ ચિદ્રૂપા, મહા-ત્રિપુર-સુન્દરી ॥ ૧૮॥

(શ્રીં-૫ – શ્રીં હ્રી ક્લીં ઐં સૌઃ,
ૐ-૩ – ૐ હ્રીં શ્રીં,
ક-૫ – ક એ ઈ લ હ્રીં,
હ-૬ – હ સ ક હ લ હ્રીં ,
સ-૪ – સ ક લ હ્રીં,
સૌઃ-૫ – સૌઃ ઐં ક્લીં હ્રીં શ્રીં)

॥ ફલ-શ્રુતિ ॥

ઇતિ તે કથિતં દેવ!, બ્રહ્માનન્દ-મયં પરમ્ ।
શ્રી મહા-યોનિરાખ્યાતં, કવચં દેવ-દુર્લભમ્ ॥ ૧॥

મમ તેજસા રચિતં, શ્રીવિદ્યા-ક્રમ-સંયુતમ્ ।
તવ સ્નેહાન્મહા-દેવ!, તવાગ્રે તુ મયોદિતમ્ ॥ ૨॥

રાજ્યં દેયં શિરો દેયં, ન દેયં કવચં પરમ્ ।
દેયં પૂર્ણાભિષિક્તાય, સ્વ-શિષ્યાય મહેશ્વર ! ॥ ૩॥

અન્યથા નારકી ભૂયાત્, કલ્પ-કોટિ-શતૈરપિ ।
દિક્-સહસ્રેણ પાઠેન, હ્યાસાધ્યં સાધ્યતે ક્ષણાત્ ॥ ૪॥

લક્ષં જપત્વા મહા-દેવ!, તદ્દશાંશં હુનેદ્ યદિ ।
બ્રહ્મ-જ્ઞાનમવાપ્નોતિ, પર-બ્રહ્મણિ લીયતે ॥ ૫॥

ભૂર્જે વિલિખ્ય ગુટિકાં, સ્વર્ણસ્થાં ધારયેદ્ યદિ ।
કણ્ઠે વા દક્ષિણે બાહૌ, સાક્ષાત્ કામેશ્વરો ભવેત્ ।
નારી વામ-ભુજે ધૃત્વા, ભવેત્ ત્રિપુર-સુન્દરી ॥ ૬॥

ૐ તત્સત્ શ્રીમહા-નિર્વાણ-તન્ત્રે શ્રીમહા-યોનિ-નામ
શ્રીમન્મહા-ત્રિપુર-સુન્દરી-કવચં સમ્પૂર્ણમ્ ॥

Encoded by Pankaj Dubey
Proofread by Pankaj Dubey, Preeti N. Bhandare

*Shri Para Mahayoni Kavacha Sadhana*
pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*